॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ७६

ततः शरं दाशरथिः सन्धायामित्रकर्शनः ।
ससर्ज राक्षसेन्द्राय क्रुद्धः सर्प इव श्वसन् ॥ १॥

तस्य ज्यातलनिर्घोषं स श्रुत्वा रावणात्मजः ।
विवर्णवदनो भूत्वा लक्ष्मणं समुदैक्षत ॥ २॥

तं विषण्णमुखं दृष्ट्वा राक्षसं रावणात्मजम् ।
सौमित्रिं युद्धसंसक्तं प्रत्युवाच विभीषणः ॥ ३॥

निमित्तान्यनुपश्यामि यान्यस्मिन्नावणात्मजे ।
त्वर तेन महाबाहो भग्न एष न संशयः ॥ ४॥

ततः सन्धाय सौमित्रिः शरानग्निशिखोपमान् ।
मुमोच निशितांस्तस्मै सर्वानिव विषोल्बणान् ॥ ५॥

शक्राशनिसमस्पर्शैर्लक्ष्मणेनाहतः शरैः ।
मुहूर्तमभवन्मूढः सर्वसङ्क्षुभितेन्द्रियः ॥ ६॥

उपलभ्य मुहूर्तेन संज्ञां प्रत्यागतेन्द्रियः ।
ददर्शावस्थितं वीरं वीरो दशरथात्मजम् ॥ ७॥

सोऽभिचक्राम सौमित्रिं रोषात्संरक्तलोचनः ।
अब्रवीच्चैनमासाद्य पुनः स परुषं वचः ॥ ८॥

किं न स्मरसि तद्युद्धे प्रथमे मत्पराक्रमम् ।
निबद्धस्त्वं सह भ्रात्रा यदा युधि विचेष्टसे ॥ ९॥

युवा खलु महायुद्धे शक्राशनिसमैः शरैः ।
शायिनौ प्रथमं भूमौ विसंज्ञौ सपुरःसरौ ॥ १०॥

स्मृतिर्वा नास्ति ते मन्ये व्यक्तं वा यमसादनम् ।
गन्तुमिच्छसि यस्मात्त्वं मां धर्षयितुमिच्छसि ॥ ११॥

यदि ते प्रथमे युद्धे न दृष्टो मत्पराक्रमः ।
अद्य त्वां दर्शयिष्यामि तिष्ठेदानीं व्यवस्थितः ॥ १२॥

इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणम् ।
दशभिश्च हनूमन्तं तीक्ष्णधारैः शरोत्तमैः ॥ १३॥

ततः शरशतेनैव सुप्रयुक्तेन वीर्यवान् ।
क्रोधाद्विद्धगुणसंरब्धो निर्बिभेद विभीषणम् ॥ १४॥

तद्दृष्ट्वेन्द्रजितः कर्म कृतं रामानुजस्तदा ।
अचिन्तयित्वा प्रहसन्नैतत्किं चिदिति ब्रुवन् ॥ १५॥

मुमोच स शरान्घोरान्सङ्गृह्य नरपुङ्गवः ।
अभीतवदनः क्रुद्धो रावणिं लक्ष्मणो युधि ॥ १६॥

नैवं रणगतः शूराः प्रहरन्ति निशाचर ।
लघवश्चाल्पवीर्याश्च सुखा हीमे शरास्तव ॥ १७॥

नैवं शूरास्तु युध्यन्ते समरे जयकाङ्क्षिणः ।
इत्येवं तं ब्रुवाणस्तु शरवर्षैरवाकिरत् ॥ १८॥

तस्य बाणैस्तु विध्वस्तं कवचं हेमभूषितम् ।
व्यशीर्यत रथोपस्थे ताराजालमिवाम्बरात् ॥ १९॥

विधूतवर्मा नाराचैर्बभूव स कृतव्रणः ।
इन्द्रजित्समरे शूरः प्ररूढ इव सानुमान् ॥ २०॥

अभीक्ष्णं निश्वसन्तौ हि युध्येतां तुमुलं युधि ।
शरसङ्कृत्तसर्वाङ्गो सर्वतो रुधिरोक्षितौ ॥ २१॥

अस्त्राण्यस्त्रविदां श्रेष्ठौ दर्शयन्तौ पुनः पुनः ।
शरानुच्चावचाकारानन्तरिक्षे बबन्धतुः ॥ २२॥

व्यपेतदोषमस्यन्तौ लघुचित्रं च सुष्ठु च ।
उभौ तु तुमुलं घोरं चक्रतुर्नरराक्षसौ ॥ २३॥

तयोः पृथक्पृथग्भीमः शुश्रुवे तलनिस्वनः ।
सुघोरयोर्निष्टनतोर्गगने मेघयोरिव ॥ २४॥

ते गात्रयोर्निपतिता रुक्मपुङ्खाः शरा युधि ।
असृग्दिग्धा विनिष्पेतुर्विविशुर्धरणीतलम् ॥ २५॥

अन्यैः सुनिशितैः शस्त्रैराकाशे सञ्जघट्टिरे ।

बभञ्जुश्चिच्छिदुश्चापि तयोर्बाणाः सहस्रशः ॥ २६ ॥

स बभूव रणे घोरस्तयोर्बाणमयश्चयः ।
अग्निभ्यामिव दीप्ताभ्यां सत्रे कुशमयश्चयः ॥ २७ ॥

तयोः कृतव्रणौ देहौ शुशुभाते महात्मनोः ।
सपुष्पाविव निष्पत्रौ वने शाल्मलिकुंशुकौ ॥ २८ ॥

चक्रतुस्तुमुलं घोरं संनिपातं मुहुर्मुहुः ।
इन्द्रजिल्लक्ष्मणश्चैव परस्परजयैषिणौ ॥ २९ ॥

लक्ष्मणो रावणिं युद्धे रावणिश्चापि लक्ष्मणम् ।
अन्योन्यं तावभिघ्नन्तौ न श्रमं प्रत्यपद्यताम् ॥ ३० ॥

बाणजालैः शरीरस्थैरवगाढैस्तरस्विनौ ।
शुशुभाते महावीरौ विरूढाविव पर्वतौ ॥ ३१ ॥

तयो रुधिरसिक्तानि संवृतानि शरैर्भृशम् ।
बभ्राजुः सर्वगात्राणि ज्वलन्त इव पावकाः ॥ ३२ ॥

तयोरथ महान्कालो व्यतीयाद्युध्यमानयोः ।
न च तौ युद्धवैमुख्यं श्रमं वाप्युपजग्मतुः ॥ ३३ ॥

अथ समरपरिश्रमं निहन्तुं
समरमुखेष्वजितस्य लक्ष्मणस्य ।
प्रियहितमुपपादयन्महौजाः
समरमुपेत्य विभीषणोऽवतस्थे ॥ ३४ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com